Roll No. ........................... Total Printed Pages - 4

# F-3122

## B.A. (PART-I) EXAMINATION, 2022

## (New Course)

## SANSKRIT LITERATURE

### Paper Second

### (गद्य कथा एवं साहित्येतिहास)

*Time : Three Hours]* *[Maximum Marks:75*

**नोट- सर्वे प्रश्नाः समाधेयाः**

### इकाई -1

1. अधोलिखितेषु सप्रसङ्गं व्याख्या कार्या (द्वयोः)

$7\frac{1}{2} + 7\frac{1}{2} = 15$

**(क)** ----अयमेव चानास्वादित विषयरसस्य ते काल उपदेशस्य। कुसुमशरशरप्रहारजर्जरिते हि हृदये जलमिव गलत्युपदिष्टम्। अकारणञ्च भवति दुष्प्रकृतेरन्वयः श्रुतं वा विनयस्य। चन्दनप्रभवो न दहति किमनलः? किं वा प्रशमहेतुनापि न प्रचण्डतरीभवति वडवानलो वारिणा?

**(ख)** गन्धर्वनगरलेखेव पश्यत एव नश्यति

P.T.O.



अद्याप्यारूढ़मन्दपरिवर्त्तावर्त-भ्रान्ति-जनित-संस्कारेव परिभ्रमति, कमलिनीसञ्चरणव्यतिकरलग्न-नलिन-नाल-कण्टक-क्षतेव न क्वचिदपि निर्भरमाब-ध्नाति पदम्। अति प्रयत्नविघृताऽपि परमेश्वर-गृहेषु विविधगन्धगजगण्डमधुपानमत्तेव परिस्खलति।

**(ग)** सर्वथा कल्याणैः पित्रा क्रियमाणमनुभवतु भवान् नवयौवराज्याभिषेकमङ्गलम्। कुलक्रमागतामुदूह पूर्वपुरुषैरूढां धुरम्, अवनमय द्विषतां शिरांसि। उन्नमय बन्धुवर्गम्। अभिषेकानन्तरञ्च आरब्धदिग्विजयः परिभ्रमन् विजितामपि तव पित्रा सप्तद्वीपभूषणां पुर्नविजयस्व वसुन्धराम्।

### इकाई - II

2. अधोलिखितेषु त्रयाणां सप्रसङ्गमुत्तरं कुरुत। **3×5=15**

(क) अजराऽमरवत् प्राज्ञो विद्यामर्थं च चिन्तयेत्।

गृहीत इव केशेषु मृत्युना धर्ममाचरेत्।।

(ख) यौवनं धनसम्पत्तिः प्रभुत्वमविवेकिता।

एकैकमप्यनर्थाय किमु चत्र चतुष्टयम्।।

(ग) वरमेको गुणी पुत्रो न च मूर्खशतैरपि।

एकश्चन्द्रस्तमो हन्ति न च तारागणैरपि।।

(घ) यथा मृत्पण्डितः कर्त्ता कुरुते यद् यदिच्छति।

एवमात्मकृतं कर्म मानवः प्रतिपद्यते।।

(ङ) अरावप्युचितं कार्यमातिथ्यं गृहमागते।

छेत्तुः पार्श्वगताच्छायां नोपसंहरते द्रुमः।।

(च) दीपनिर्वाणगन्धञ्च सुहृद्वाक्यमरुन्धतीम्।

न जिघ्रन्ति न शृण्वन्ति न पश्यन्ति गताऽयुषः।।

**इकाई - III**

3. कवेः बाणभट्टस्य सामान्यपरिचयं प्रदाय शुकनासोपदेशस्य कथासारं लिखत। **15**

**अथवा**

हितोपदेशानुसारं वृद्धव्याघ्र-पथिक-कथां सप्रसङ्गमालोच्य प्राप्तां शिक्षामुल्लिखत।

**इकाई - IV**

4. उपनिषदां महत्तवम् आलोच्य पञ्चानाम् उपनिषदां सामान्यपरिचयं प्रदत्त। **15**

**अथवा**

पुराणलक्षणं विलिख्य पञ्चानां पुराणानां परिचयं प्रदत्त।

**इकाई - V**

5. कवेः माघस्य परिस्वयं प्रदाय महाकाव्येषु शिशुपालवधस्य स्थानं निरूपयत। **15**





**अथवा**

बाणभट्टस्य परिचयं प्रदाय तस्य कृताः आलोचयत।